श्रीसुरसरस्वतीसभा, शृङ्गेरी

तुरीया परीक्षा - प्रथमपत्रिका

दिनाङ्कः - २६.०८.२०१८ अङ्काः१००

पूर्वाह्णः - १०.०० तः १.०० पर्यन्तम्। समयः - होरात्रयम्

सूचना- सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि।

1. प्रश्नानामेकवाक्येन उत्तरं लिखत। 5

१. शिवगुरुः ईशं किं ययाचे ?

२. राज्ञे कौत्सः कीदृशमाशिषं ददौ ?

३. भगवतो जन्मकर्मणोः को हेतुः ?

४. कस्य तृतीया गतिर्भवति ?

५. अम्बरस्थः चन्द्रः कथं बभ्राज ?

६. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

७. शृङ्गेरीवासः कस्मात्ग्रन्थात्समुद्धृतः ?

८. स्वगुणेन युधिष्ठिरः पश्चात्कः इति पप्रथे?

2. प्रश्नानां द्वित्रैः वाक्यैः उत्तरं लिखत। 10

१. गिरिः गुरुसेवां कथं विदधौ ?

२. कुन्त्याः सेवया प्रीतः दुर्वासाः तां किमाह ?

३. भगवतो विभूतिः कीदृशी ?

४. सत्पुरुषाः, सामान्याः, मानुषराक्षसाः, इतरे - विशदयत।

५. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः ?

६. गर्भिणी मृगावती भर्तारं सहस्रानीकं प्रति किं दोहदं शशंस ?

७. "माभूत्परीवादनवावतारः " कीदृशः सः परीवादः ?

3. द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत। 8

१. पुत्रीयन् पाण्डुः कुन्तीं किमवोचत् ?

२. हस्तामलकस्य पूर्ववृत्तं वर्णयत।

३. रघोः औदार्यं विशदयत।

४. स्वयंवरार्थम् आगच्छन्तं नलं दृष्ट्वा देवाः किमवोचन् ?

4. वाक्यत्रयं सप्रसङ्गं विवृणुत। 9

१. " वर्धिष्णुः भुवनगुरुः यतो विवेश "।

२. " वत्से, मा शुचः। कञ्चित्कालमत्रैव आश्रमे वस "।

३. " हिंस्रस्य दमनाय हि राज्ञां शस्त्रं न तु कृपणजनक्लेशाय "।

४. " कोटीश्चतस्रो दशचाहरेति "।

5. द्वयोः भावं विशदयत। 8

१. अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥

२. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च॥

३. या भाति लक्ष्मीर्भुविमन्दस्था तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारु निशाकरस्था ॥

6. श्लोकं पूर्णं लिखत। 4

१. यावत्स्वस्थमिदं ----------------------प्रत्युद्यमः कीदृशः।

२. यद्धात्रा ---------------------------------- तुल्यं जलम्।

7. एकस्य कवेः देश-काल-कृति-महत्त्वादीनां विषये लिखत। 4

१. लक्ष्मणशास्त्री २. विद्वान् कृष्णशास्त्री

8. एकस्य लघुटिप्पणीं लिखत। 4

१. उदयनः २ . द्रोणः

9. चत्वारि पदानि वाक्ये योजयत। 4

१. असकृत् २. ओघः ३. नयनानन्दकरः

४. अवज्ञा ५. विशाम्पतिः ६. सद्भावान्

10. चतुर्णां रूपाणि विवेचयत। 4

| | | |
|---|---|---|
| १. जज्ञे | २. प्रायश्चित्तीयन् | ३. कवची |
| ४. जगाद | ५. दक्षता | ६. भारद्वाजः |

11. चतुर्णां पर्यायपदानि लिखत। 4

| | | |
|---|---|---|
| १. अध्वरः | २. सपदि | ३. दाशेयी |
| ४. जाम्बूनदम् | ५. सङ्कर्षणः | ६. शार्दूलः |

12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत। 4

| | | |
|---|---|---|
| १. शार्ङ्गपाणिः | २. निशाकरस्था | ३. पाणिपादम् |
| ४. सरोरुहाक्षी | ५. आत्मगुणानुरूपः | ६. पञ्चनली |

13. सन्धिं विभज्य नाम लिखत। 4

| | | |
|---|---|---|
| १. उक्तिरियम् | २. स्वस्त्यस्तु | ३. मानुषोऽपि |
| ४. गच्छंश्च | ५. अधीयन्नर्जुनः | ६. तच्छ्रुत्वा |

14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत। 6

| | | |
|---|---|---|
| १. अवर्धत | २. चक्रे | ३. बभ्राज |
| ४.पेतुः | ५. गन्ता | ६. ववन्द |

15. द्वयोःव्याकरणविशेषं लिखत। 4

१. महाराजस्य　२. मा शुचः　३. पराजयत　४. आस्ते स्म

16. समासमेकं सलक्षणं सोदाहरणं विवृणुत। 4

१. बहुव्रीहिसमासः　२. द्विगुसमासः

17. चतुर्थं पदं लिखत। 4

१. यथाशक्ति - अव्ययीभावः ; दशग्रीवः - ------------ समासः

२. पर्वतस्य अपत्यं स्त्री - पार्वती ; जनकस्य अपत्यं स्त्री - -----

३. पाराशर्यः - व्यासः ; शान्तनवः - ----------------

४. ब्रह्मस्तुतिः - कुमारसम्भवः ; विष्णुस्तुतिः - --------------

18. इतरवाक्यानि लिखत 4

१. बभूव २. पराजयस्व ३. वृत्रहा ४. सम्राट्

19. रिक्तस्थानानि पूरयत। 4

१. अनुग्रहाय लोकानामवतीर्णाय--------------------------------।

२. विद्या राजसु पूज्यते न हि धनं ------------------------- पशुः।

३. भर्तृहरिविरचितं शतकत्रयं नीतिशतकं ,---------,---------- च।

४. लोकवृत्तिसाक्षिणः देवाः ---------------------- मे पतिं दिशन्तु।

20 . प्रयोगपरिवर्तनं कुरुत। 2

१. दुर्वासाः कुन्त्या सत्कृतः।

२. तरवः नम्राः भवन्ति।

---

**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तुरीयापरीक्षा - द्वितीयपत्रिका**

**दिनाङ्कः-** २६.०८.२०१८ — **अङ्काः-** ५०

**अपराह्णः-** १.३०तः ३.००पर्यन्तम् — **समयः** सार्धैकहोरा

**सूचना-** सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि।

1. **विषयमेकमधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत।** 5

१.समाचारपत्रम्  २.सत्सङ्गतिः  ३.गङ्गानदी

2. अ) निर्धारणषष्ठी–सप्तमी- च सोदाहरणं विवृणुत। 4

आ) पञ्चमीविभक्तिः कदा भवति ? सोदाहरणं विवृणुत। 4

3. अ) " उत्प्रेक्षालङ्कारम् " सोदाहरणं सलक्षणं विशदयत। 4

आ) मातस्समस्तजगतां मधुकेटभारेः। एतस्य वृत्तं सलक्षणं सप्रस्तारं च निरूपयत। 4

4. **उत्तरं लिखत। (त्रयाणामेव )** 3

१. कृधातोः कर्मणि लुङ् प्रथमैकवचनं लिखत ।

२. सारालङ्कारस्य उदाहरणं लिखत ।

३. अतिशयोक्तेः लक्षणं किम् ?

४. "रुच्" धातोः योगे का विभक्तिः प्रयुज्यते ?

5. **द्वयोः लकारयोः पुरुषत्रये लिखत।** 6

१. कुर्यात्  २. अवन्दिष्यत  ३. वर्धिषीष्ट  ४. पेचे

6. **प्रयोगपरिवर्तनं कुरुत।** 4

१. प्रजाः धर्मतत्पराः तिष्ठन्ति।  २. मुनिः उग्रं तपः आचरति।

३. किमर्थं भवान् तूष्णीं तिष्ठति ?  ४. क्रीड्यतां नाम सायङ्काले बालकैः।

7. वाक्यदोषं परिहरत। 4

१. कैलासे अध्यास्ते।

२. कृष्णेन परितः गोपाः।

३. रामं ऋते सर्वे आगताः।

४. भोजस्य कालिदासाय महानादरः।

8. टिप्पणीं लिखत।(एकस्य) 2

१. शब्दालङ्कारः

२. तोटकम्

9. मातृभाषया अनुवदत । 5

१. गोषु दुग्धासु गतः।

२. गुरोः प्रसादेन विद्वांसो भूयास्म।

३. कः खलु गुरुद्रोहमकरिष्यत् ।

४. भवद्भिः सुष्ठु अभाषि।

५. दर्शनेषु वेदान्तः प्रधानम्।

10. संस्कृतभाषया परिवर्तयत। 5

1. Among the languages Sanskrit is sweetest.
   ಎಲ್ಲಾ ಭಾಷೆಗಳಲ್ಲಿಯೂ ಸಂಸ್ಕೃತಭಾಷೆಯು ಮಧುರವಾದದ್ದು.
2. I will tell you after they go away.
   ಅವರು ಹೋದ ಮೇಲೆ ನಾನು ನಿನಗೆ ಹೇಳುತ್ತೇನೆ.
3. If Mother knows she would feel happy.
   ತಾಯಿಯು ತಿಳಿದಿದ್ದರೆ ಸಂತೋಷ ಪಡುತ್ತಿದ್ದಳು.
4. When wife was praised by the husband it was felt shy by her.
   ಪತಿಯು ಪತ್ನಿಯಿಂದ ಪ್ರಶಂಸಿಸಲ್ಪಟ್ಟಾಗ ಅವಳಿಂದ ನಾಚಿಕೆಗೊಳ್ಳಲ್ಪಟ್ಟಿತು.
5. Goldsmiths made ornaments using gold.
   ಅಕ್ಕಸಾಲಿಗರು ಚಿನ್ನದಿಂದ ಆಭರಣವನ್ನು ತಯಾರಿಸಿದರು.

-------------